The śāstramañjūṣā, A Virtual Publication for the Peer Reviewed Research papers on Indology
https://sites.google.com/site/praachiprajnaa/sastramanjusa

# सांख्यदर्शने पञ्चविंशतितत्त्वविचारः

Dr. K.V.R.B. VARA LAKSHMI

{षड्वैदिकदर्शनेष्वन्यतमं साङ्ख्यदर्शनं, ज्ञानिनां कृते अजिह्मा राजपद्धतिः । अत्र पञ्चविंशतितत्त्वानि अभिमतानि । प्रकृतिः पुरुषः इति मूलतः तत्त्वद्वयं नित्यं, पुरुषबहुत्वञ्चाङ्गीकृतम् । प्रकृतेः विकाराः अन्यानि त्रयोविंशतितत्त्वानि एवमाहत्य पञ्चविंशतितत्त्वानि, इमानि क्रमशः कथं समुत्पद्यन्ते तेषां विवरणमिह लेखे प्रस्तुतं लेखकेन । लेखेऽस्मिन् अनुसन्धानात्मकत्वापेक्षया वर्णनात्मकतायाः प्राबल्यं दृश्यते । } : सम्पादकः

न्यायवैशेषिकसांख्ययोगपूर्वोत्तरमीमांसाः षड्दर्शन नाम्ना विख्यातानि। भारतीयदर्शनेषु सांख्यदर्शनं अत्यन्तं प्राचीनतमं भवति। सांख्यदर्शनस्य कर्ता कपिल महर्षिः। ऋग्वेदे कपिल इति शब्दः दृश्यते। कपिलः साक्षात् नारायणावतारः इति कपिलात् परा विद्या न विद्यते इति श्रूयते। श्रीमद्भगवद्गीतायां सिद्धानां कपिलोमुनिः इति श्रीकृष्णः उवाच।[1]

सम् उपसर्गपूर्वक चक्षिङ् धातोः अङ् प्रत्ययात् सांख्यशब्दः निष्पन्नो भवति। सम्यक् ख्याति, सम्यक् दर्शनम् अथवा सम्यक् ज्ञानमेव सांख्यशब्दस्य व्युत्पत्यर्थः। दार्शनिकाः सांख्यशब्दस्य संख्यायन्ते गणयन्ते येन तत् सांख्यमिति, प्रकृतिपुरुषान्यताख्यातिरूपोऽवबोधो सम्यक् ज्ञायते येन तत्सांख्यम् इति निर्वचनं कुर्वन्ति।

सांख्यदर्शने पञ्चविंशतिः तत्त्वानि प्रतिपादितानि। सत्वरजस्तमसां साम्यवस्था प्रकृतिः, प्रकृतेर्महान्, महतोऽहङ्कारोऽङ्कारात् पञ्चतन्मात्राण्युभयमिन्द्रियं, मनः, तन्मान्त्रेभ्यः स्थूलभूतानि, पुरुष इति पञ्चविंशतिसर्गः[2] इति सांख्यदर्शने कथितम्। तथैव विषयोऽयं सांख्यकारिकासु एवं कथितः-

"मूलप्रकृतिरविकृतिर्महदाद्याः प्रकृतिविकृतयः सप्त।
षोडशकस्तुविकारो न प्रकृतिर्नविकृतिः पुरुषः॥[3]

इति ईश्वरकृष्णः। एतेषु पञ्चविंशतितत्त्वेषु प्रकृतिः, प्रकृतिविकृतिः, विकृतिः, तथा प्रकृतिविकृतिभिनाश्च तत्त्वानि दृश्यन्ते।

१. मूलप्रकृतिः :- मूलप्रकृतेः प्रधानं इति नामान्तरं अस्ति। सा मूलप्रकृति सत्वरजस्तमोगुणानां साम्यवस्था भवति। प्रकारोतीति प्रकृतिः इति व्युत्पत्तिः। प्रकृत्यां स्थितसत्वरजस्तमोगुणाः महदादीनां

---

पदटिप्पण्यः :-

1. श्रीमद्भगवद्गीता-अध्यायः-10-श्लो-26-पृ.सं.-220

2-सांख्यदर्शनम्.61-पृ. 63

3 सांख्यकारिका-2

उपादानकारणानि भवन्ति। "सत्त्वरजस्तम इति गुणाः प्रकृतिसम्भवाः"[4] इति गीताचार्येण कथितम्। सत्वरजस्तमोगुणाः त्रयः प्रकृत्यां आविर्भवन्ति। एषा मूलप्रकृतिः एव भवति। सा प्रकृति विकृतिः तथा विकृतिश्च न भवति।

२. महत्तत्वम् :- प्रकृतेः प्रथमविकारो महत्तत्त्वम्। महत्तत्त्वस्य बुद्धिः इति अपरं नाम विख्यातम्। सात्विकांशाधिकप्रधानात् महत्तत्त्वम् आविर्भवति। अतः प्रकृतेः प्रथमविकारो भवति महत्तत्त्वम्। तत् सात्विकं तामसं चेति द्विविधं भवति। सांख्यकारिकासु "अध्यवसायो बुद्धिधर्मोज्ञानविराग ऐश्वर्यं सात्त्विकमेतद्रूपं तामसस्तद्विपर्यस्तम् [5] इति अनेन धर्म, ज्ञान, वैराग्य ऐश्वर्याः चत्वारः सात्त्विकबुद्धिगुणाः इति ज्ञायते। तद्विपरीताः, तामसबुद्धि गुणाः भवन्ति (अधर्म, अज्ञान, निर्वैराग्यम्, अनैश्वर्यम्) महत्तत्त्वं प्रकृतिः तथा विकृतिश्च भवति।

३. अहङ्कारः:- "महतोऽहङ्कारः।"[6] महत्त्वात् अहङ्कारः आविर्भवति। अहङ्कारः सात्त्विक, राजसिक, तामसिक भेदैः त्रिविधो भवति। सात्त्विकाहङ्कारस्य वैकारिकम् इति राजसाहङ्कारस्य तैजसमिति, तामसिकाहङ्कारस्य भूतादि इति नामानि।

"वाक्पाणिपादपायूपस्थाः कर्मेन्दियाण्याहुः" उभयात्मकमत्र मनः संकल्पमिद्रियं च सा धर्म्यात्।[7] वैकारिकादहङ्कारात् मनः उत्पद्यति। चक्षुः श्रोत्रघ्राणरसनत्वक् इति पञ्चज्ञानेन्द्रियाणि, वाक्पाणिपादपायूपस्था चेति कर्मेन्द्रियाणि राजसाहङ्कारात् तथा तामसाहङ्कारात् पञ्चतन्मात्राणि तामसिकाहङ्कारात् पञ्चतन्मात्राणां आविर्भावः। पञ्चतन्मात्रेभ्यः पञ्चमहाभूतानामाविर्भवः भवति।

**सांख्यतत्त्वानि :-**

मूलप्रकृतिः (प्रकृतिः) प्रथम गणः

↓

महत्तत्वं (विकृतिः+प्रकृतिः) द्वितीयगणः

↓

अहङ्कारः (विकृतिः+प्रकृतिः) द्वितीयगणः

↓

पञ्चतन्मात्राणि (५) (विकृतिः+प्रकृतिः) द्वितीयगणः ज्ञानेन्द्रियाणि (५), कर्मेन्द्रियाणि (५), मनश्च सात्त्विकाहङ्कारतामसिकाहङ्कारात्

---

4. श्रीमद्भगवद्गीता-अ-१४-श्लो-५, पृ.-२९५

5. सांख्यकारिका-२२

6. सांख्यकारिका-सू-६५-पृ.--६८

7. सांख्यकारिका-सू-२४-२५

"प्राची प्रज्ञा"

प्राचीमनु प्रदिशं प्रेहि विद्वान् (शुक्लयजुर्वेदः, वा.मा.सं. 7.66)

*The Refereed & Peer Reviewed E-Journal*

https://sites.google.com/site/praachiprajnaa

ISSN – 2348 - 8417

प्रमाणीक्रियते यत् डा. के.वि.आर्.बि. वरलक्ष्मी - महोदयायाः "सांख्यदर्शने पञ्चविंशति तत्त्वविचारः" इति शीर्षकं शोधपत्रं "प्राची प्रज्ञा" इति सन्दर्भितपुनरीक्षितान्तर्जालपत्रिकायाः शास्त्रमञ्जूषायां जून्-2019तमे वर्षे अष्टमेऽङ्के प्रकाशितम् ।

**Certified that a research paper titled "सांख्यदर्शने पञ्चविंशति तत्त्वविचारः" authored by Dr. K.V.R.B.Varalakshmi was published in the issue VIII of June-2019 of "śāstramañjūṣā" in the Refereed & Peer Reviewed E Journal in Sanskrit "prācī prajñā".**

Dr. Sugyan Kumar Mahanty

Editor in Chief

"प्राची प्रज्ञा"

Email - prachiprajnaenb@gmail.com

"शास्त्रमञ्जूषा"

The section for Research Papers

https://sites.google.com/site/praachiprajnaa/mukhaputam/sastramanjusa

ISSN 2348 – 8417

# शास्त्रमञ्जूषा

## The śāstramañjūṣā

https://sites.google.com/site/praachiprajnaa/sastramanjusa

(A Virtual Publication for the Peer Reviewed Research papers on Indology)

Of

# प्राची प्रज्ञा

## prācī prajñā

https://sites.google.com/site/praachiprajnaa

**Reviewers of the Issue – Prof. N. C. Panda**

**- Dr. Nav Lata**

**Editor in Chief - Dr. Sugyan Kumar Mahanty**

**Editor - Dr. Devadatta Sarode**

**8th Issue of Vol. V**

## Contents


| | | | |
|---|---|---|---|
| 1. | Editorial | सम्पादकीयम् | Dr. Devadatta sarode |
| 2. | R. Venkata Raghavan | र वेंकट राघवन् | On The Contemporary Understanding of *Ākāṅkṣā* |
| 3. | Nilachal Mishra | नीलाचलमिश्रः | The concept of Īśvara or Brahman |
| 4. | Dr. Varda Vasa | डा.वरदा वसा | The meaning of Verbal Root and Verbal Ending: An Appraisal of the views of the Grammarians, Logicians and Mīmāṁsakas. |
| 5. | Abhisek Mukherjee | अभिषेक-मुखार्जी | दर्शनेषु प्रमाणसामान्यपरिचयः |
| 6. | RITA PAL | रीतापाल | बृहदारण्यकोपनिषदि यज्ञप्रसङ्गः – एकं समीक्षात्मकमालोचनम् |
| 7. | Dr. Harish | डॉ.हरीश | बृहदारण्यकोपनिषद् में प्रतिपादित याज्ञवल्क्य-मैत्रेयी-संवाद की वर्त्तमान परिप्रेक्ष्य में प्रासंगिकता |
| 8. | Jhantu Das | झण्टुदासः | भारतीयदर्शने प्रत्यक्षप्रमाणतत्त्वम् |
| 9. | Dr. Sujatha Munukutla | डा. सुजाता मुनुकुट्ल | भारतीयवैदिकदर्शनपुराणसाहित्ये सृष्टिप्रक्रियायाः मूलभूतेषु तत्त्वेषु जलतत्त्वस्य प्राधान्यम् |
| 10. | Ishwar P Bhat | ईश्वर प भट्टः | वेदान्तदर्शने आत्मसाक्षात्कारसामग्र्याम् मनसः वैशिष्ट्यम् |
| 11. | SujitParamanik | सुजित-परामानिकः | वेदान्ते पञ्चप्रमेयाणां विमर्शः |
| 12. | Dr. Ranjeet Kumar | डा. रणजीतकुमारः | वेदोपाङ्गे अद्वैतवेदान्ते सृष्टिः |
| 13. | Vani Manjunath Hegde | वाणी मञ्जुनाथ हेगडे | वैशेषिकदर्शने मोक्षविचारः |
| 14. | Dr. Jai Krishan | डा.जयकृष्णः | व्याकरणशास्त्रस्य कतिपयदार्शनिकसिद्धान्तानां विमर्शः |
| 15. | Dr. K.V.R.B.Varalakshmi | डा. के.वि.आर्.बि. वरलक्ष्मी | सांख्यदर्शने पञ्चविंशति तत्त्वविचारः |

The śāstramañjūṣā, A Virtual Publication for the Peer Reviewed Research papers on Indology
https://sites.google.com/site/praachiprajnaa/sastramanjusa

# सांख्यदर्शने पञ्चविंशतितत्त्वविचारः

Dr. K.V.R.B. VARA LAKSHMI

{षड्वैदिकदर्शनेष्वन्यतमं साङ्ख्यदर्शनं, ज्ञानिनां कृते अजिह्मा राजपद्धतिः । अत्र पञ्चविंशतितत्त्वानि अभिमतानि । प्रकृतिः पुरुषः इति मूलतः तत्त्वद्वयं नित्यं, पुरुषबहुत्वञ्चाङ्गीकृतम् । प्रकृतेः विकाराः अन्यानि त्रयोविंशतितत्त्वानि एवमाहत्य पञ्चविंशतितत्त्वानि, इमानि क्रमशः कथं समुत्पद्यन्ते तेषां विवरणमिह लेखे प्रस्तुतं लेखकेन । लेखेऽस्मिन् अनुसन्धानात्मकत्वापेक्षया वर्णनात्मकतायाः प्राबल्यं दृश्यते । } : सम्पादकः

न्यायवैशेषिकसांख्ययोगपूर्वोत्तरमीमांसाः षड्दर्शन नाम्ना विख्यातानि। भारतीयदर्शनेषु सांख्यदर्शनं अत्यन्तं प्राचीनतमं भवति। सांख्यदर्शनस्य कर्ता कपिल महर्षिः। ऋग्वेदे कपिल इति शब्दः दृश्यते। कपिलः साक्षात् नारायणावतारः इति कपिलात् परा विद्या न विद्यते इति श्रूयते। श्रीमद्भगवद्गीतायां सिद्धानां कपिलोमुनिः इति श्रीकृष्णः उवाच।[1]

सम् उपसर्गपूर्वक चक्षिङ् धातोः अङ् प्रत्ययात् सांख्यशब्दः निष्पन्नो भवति। सम्यक् ख्याति, सम्यक् दर्शनम् अथवा सम्यक् ज्ञानमेव सांख्यशब्दस्य व्युत्पत्यर्थः। दार्शनिकाः सांख्यशब्दस्य संख्यायन्ते गणयन्ते येन तत् सांख्यमिति, प्रकृतिपुरुषान्यताख्यातिरूपोऽवबोधो सम्यक् ज्ञायते येन तत्सांख्यम् इति निर्वचनं कुर्वन्ति।

सांख्यदर्शने पञ्चविंशतिः तत्त्वानि प्रतिपादितानि। सत्वरजस्तमसां साम्यवस्था प्रकृतिः, प्रकृतेर्महान्, महतोऽहङ्कारोऽङ्कारात् पञ्चतन्मात्राण्युभयमिन्द्रियं, मनः, तन्मान्त्रेभ्यः स्थूलभूतानि, पुरुष इति पञ्चविंशतिसर्गः[2] इति सांख्यदर्शने कथितम्। तथैव विषयोऽयं सांख्यकारिकासु एवं कथितः-

"मूलप्रकृतिरविकृतिर्महादाद्याः प्रकृतिविकृतयः सप्त।
षोडशकस्तुविकारो न प्रकृतिर्नविकृतिः पुरुषः॥[3]

इति ईश्वरकृष्णः। एतेषु पञ्चविंशतितत्त्वेषु प्रकृतिः, प्रकृतिविकृतिः, विकृतिः, तथा प्रकृतिविकृतिभिनाश्च तत्त्वानि दृश्यन्ते।

१. मूलप्रकृतिः :- मूलप्रकृतेः प्रधानं इति नामान्तरं अस्ति। सा मूलप्रकृति सत्वरजस्तमोगुणानां साम्यवस्था भवति। प्रकारोतीति प्रकृतिः इति व्यत्पुत्तिः। प्रकृत्यां स्थितसत्वरजस्तमोगुणाः महदादीनां

---

पदटिप्पण्यः :-

1. श्रीमद्भगवद्गीता-अध्यायः-10-श्लो-26-पृ.सं.-220

2-सांख्यदर्शनम्.61-पृ. 63

3 सांख्यकारिका-2

उपादानकारणानि भवन्ति। "सत्त्वरजस्तम इति गुणाः प्रकृतिसम्भवाः"[4] इति गीताचार्येण कथितम्। सत्वरजस्तमोगुणाः त्रयः प्रकृत्यां आविर्भवन्ति। एषा मूलप्रकृतिः एव भवति। सा प्रकृति विकृतिः तथा विकृतिश्च न भवति।

२. महत्तत्वम् :- प्रकृतेः प्रथमविकारो महत्तत्त्वम्। महत्तत्त्वस्य बुद्धिः इति अपरं नाम विख्यातम्। सात्विकांशाधिकप्रधानात् महत्तत्त्वम् आविर्भवति। अतः प्रकृतेः प्रथमविकारो भवति महत्तत्त्वम्। तत् सात्विकं तामसं चेति द्विविधं भवति। सांख्यकारिकासु "अध्यवसायो बुद्धिधर्मोज्ञानविराग ऐश्वर्यं सात्विकमेतद्रूपं तामसस्तद्विपर्यस्तम्"[5] इति अनेन धर्म, ज्ञान, वैराग्य ऐश्वर्याः चत्वारः सात्विकबुद्धिगुणाः इति ज्ञायते। तद्विपरीताः, तामसबुद्धि गुणाः भवन्ति (अधर्म, अज्ञान, निर्वैराग्यम्, अनैश्वर्यम्) महत्तत्वं प्रकृतिः तथा विकृतिश्च भवति।

३. अहङ्कारः:- "महतोऽहङ्कारः।"[6] महत्त्वात् अहङ्कारः आविर्भवति। अहङ्कारः सात्विक, राजसिक, तामसिक भेदैः त्रिविधो भवति। सात्विकाहङ्कारस्य वैकारिकम् इति राजसाहङ्कारस्य तैजसमिति, तामसिकाहङ्कारस्य भूतादि इति नामानि।

"वाक्पाणिपादपायूपस्थाः कर्मेन्दियाण्याहुः" उभयात्मकमत्र मनः संकल्पमिदिंयं च सा धर्म्यात्।[7] वैकारिकादहङ्कारात् मनः उत्पद्यति। चक्षुः श्रोत्रघ्राणरसनत्वक् इति पञ्चज्ञानेन्द्रियाणि, वाक्पाणिपादपायूपस्था चेति कर्मेन्द्रियाणि राजसाहङ्कारात् तथा तामसाहङ्कारात् पञ्चतन्मात्राणि तामसिकाहङ्कारात् पञ्चतन्मात्राणां आविर्भावः। पञ्चतन्मात्रेभ्यः पञ्चमहाभूतानामाविर्भवः भवति।

सांख्यतत्त्वानि :-

मूलप्रकृतिः (प्रकृतिः) प्रथम गणः

↓

महत्तत्वं (विकृतिः+प्रकृतिः) द्वितीयगणः

↓

अहङ्कारः (विकृतिः+प्रकृतिः) द्वितीयगणः

↓

पञ्चतन्मात्राणि (५) (विकृतिः+प्रकृतिः) द्वितीयगणः ज्ञानेन्द्रियाणि (५), कर्मेन्द्रियाणि (५), मनश्च सात्विकाहङ्कारतामसिकाहङ्कारात्

---

4. श्रीमद्भगवद्गीता-अ-१४-श्लो-५, पृ.-२९५

5. सांख्यकारिका-२२

6. सांख्यकारिका-सू-६५-पृ.--६८

7. सांख्यकारिका-सू-२४-२५

विकृतयः=१६ तृतीयगणः

मूलप्रकृतिः तदितरतत्त्वानां आविर्भावकारणं भवति। स्वयं कारण रहितं च भाति। ततः सा प्रकृतिरेव। तदितर तत्त्वानां प्रकृतित्वं तथा विकृतित्वमस्ति। एतादृशाः सप्तसख्याकाः भवन्ति। महत्तत्त्वम्, अहङ्कारः पञ्चतन्मात्राणि चेति। ततः केवलविकृतिगणः। अस्मिन् गणे षोडशतत्त्वानि सम्मिलितानि। पञ्चज्ञानेद्रियाणि, पञ्चकर्मेन्द्रियाणि, पञ्चमहाभूतानि तथा मनश्चेति। चतुर्थगणः न प्रकृतिः न विकृतिः सः पुरुषः एव। पुरुषस्य प्रकृतित्वं विकृतित्वं च न विद्यते।

४. पुरुषः:- प्रकृतिविकृतिभिन्नः पुरुषः। अत एव "न प्रकृतिर्नविकृतिः पुरुषः"[8] इति ईश्वरकृष्णः। पुरुषः कूटस्थनित्यः, परिणामरहितः सांख्यसिद्धान्तमनुसृत्य पुरुषः" चैतन्य स्वरूपः। त्रिगुणातीतः, विवेकी, अविषयी, चेतनः अप्रसवधर्मो च कथितः। सांख्याः पुरुषः बहुत्वं अङ्गीकुर्वन्ति। तद्यथा जननमरणानि सर्वेषां पृथक् पृथक् गोचरन्ति एकस्य जन्मना सर्वेषां जननं एकस्य मृत्युना सर्वेषां मरणं च न सम्भवन्ति। पुरुषः सत्त्वरजस्तमोगुणातीतः। अतः केवल्यं, मामाध्यस्थ्यं च सिध्यति। विवेकित्वात् अप्रसवधर्मित्वात् च पुरुषः अकर्तेति ज्ञायते।

संघातपरार्थत्वात् त्रिगुणादिविपर्ययादधिष्ठानात्। पुरुषोस्ति भोक्तृभावात् कैवल्यार्थं प्रकृत्तेश्च"[9]

१. संघातपरार्थत्त्वात् :-

सांख्यसिद्धान्तप्रतिपादितचतुर्विंशतितत्त्वानां मूलकारणं प्रकृतिरेव भवति। सा प्रकृतिः सत्त्वरजस्तमोगुणानां संघातरूपा भवति। एतत् जगत्सर्वं त्रिगुणात्मकं संघातरूपं च भाति।

संघातरूपपदार्थः सर्वदा अन्यस्य प्रयोजनार्थं प्रवर्तत इति नियमः। व्यक्तादीनां संघातोऽपि अन्यस्य कृते एव प्रवर्तते। सः एव पुरुषः। किन्तु पुरुषः संघातस्वरूपो न भवति।

२. त्रिगुणादिविपर्ययात् :-

त्रिगुणादि इति पदे आदि शब्देन त्रिगुणमविवेकि, विषयः, सामान्यमचेतनं प्रसवधर्मि इत्यादीनि स्वीकरणीयानि। संघातरूपं सर्वं सत्वरजस्तमिगुणात्मकत्वात् अविवेकी, प्रसवधर्मी, सामान्यं च भवति। तदितरः पुरुषः अर्थात् त्रिगुणातीतः, विवेकी, चेतनः अप्रसवधर्मी असाधारणश्च भाति।

३. अधिष्ठानात् :-

त्रिगुणात्मिकपदार्थानां यः कोपि अधिष्ठानस्य आवश्यकः वर्तते। अत्रापि इन्द्रियादिसंघातरूपं जडात्मकं शरीरं चेतनपुरुषः चालयति।

४. भोक्तृभावात् :-

---

8. सांख्यकारिका-१२

9. सांख्यकारिका-२६

अत्र भोक्ता इति पदस्य द्रष्टा इत्यर्थः स्वीकरणीयः। एतत् जगत्सर्वं दृश्यं, पुरुषः द्रष्टा भवतीतित्यवगम्यते।

५. कैवल्यार्थं प्रकृतेः :-

कैवल्यस्य भावः कैवल्यम् तत् सुखदुःखातिरिक्तः। एतैः पञ्चभिः हेतुभिः पुरुषः अवगम्यते।

सर्वे जनाः सुखं मे भूयात् दुःखं माभूदिति वाञ्छन्ति। सांख्यदर्शने आध्यात्मिक, आधिभौतिक, आधिदैविक इति दुःखत्रयनिवृत्तिः प्रतिपादितम्। दुःखत्रयस्यैकान्तिकात्यन्तिकनिवृत्तिरेवापवर्ग इति कथ्यते। पञ्चविंशति तत्त्वज्ञानादेव कैवल्यप्राप्तिः सम्भवति। अत्यान्तिको दुःखत्रयाभावः कैवल्यं तत्त्वज्ञानादेव सर्वक्लेशानां निवृत्तिर्भवति। तत्त्वज्ञानं नाम सांख्यप्रतिपादितपञ्चविंशतितत्त्वानां सम्यक् ज्ञानम् एव। एवं रीत्या सांख्यसिद्धान्ते पञ्चविंशतितत्त्वानि प्रतिपादितानि।

उपयुक्तग्रन्थ सूची :-

1. अमरकोशः, अमरसिंहः, गुरुबालप्रबोधिका, जयलक्ष्मी पब्लिकेषन्स्, हैदराबाद्, 1996
2. श्रीमद्भगवद्गीता, श्री वेदव्यासमहर्षिः, इण्डोलाजिकल् बुक् हउस् बि.एच्.यु. रोड् लङ्का, वारणासी,१९८३
3. वैय्याकरणसिद्धान्तकौमुदी, मोतीलाल् बनारसीदास्, वाराणसी-2002
4. उपनिषत्सारसंग्रहः - मोतीलाल् बनारसीदास् प्रैवेट् लिमिटेड्, दिल्ली-1950
5. सांख्यकारिका , ईश्वरकृष्णः-बालकृष्णत्रिपाठी, भदैनी, वारणासी, 1971
6. सांख्यतत्वकौमुदी, वाचस्पतिमिश्रः, चौखाम्बा संस्कृतसीरीज् आफ्सीस्, वरणासी, 1921
7. याज्ञवल्क्यस्मृतिः, श्रीविश्वरूपाचार्यः, (बालक्रीडा व्याख्या) श्रीगणपतिशास्त्रिणा संशोधिता, मुन्शीराम् मनोहर् लाल् पब्लिषर्स्, नई दिल्ली, 1982
8. सांख्यकारिकावली - मोतीलाल् बनारसीदास् प्रैवेट् लिमिटेड्, दिल्ली-1950
9. सांख्यदर्शनम्-कपिलमहर्षिः-एमस्को बुक्स्, हैदराबाद्-2012

Dr. K.V.R.B. VARA LAKSHMI
HOD OF SANSKRIT, SRI YN COLLEGE, NARSAPUR, INDIA
varalakshmikvrb@gmail.com

***

Two Day Multi Lingual and Multi Dimensional National Seminar on

# "Language and Literature: Their Significance to the Present-Day Society"

## (Seminar Compendium: Volume - I)

FRANÇAIS

हिन्दी

తెలుగు

संस्कृत

عربی

اردو

English

Organised by

**Department of Languages**

SAROJINI NAIDU VANITA MAHA VIDYALAYA

Affiliated to Osmania University

(Sponsored & managed jointly by the Osmania Graduates' Association & the Exhibition Society)

(NAAC Accredited 3rd Cycle)

Mukarrajahi Road, Exhibition Grounds,

Hyderabad - 500 001 (TS)

Phone: 040-24603266 E-mail: snvmv@rediffmail.com, Website: www.snvanita.org

## INDEX / विषयसूची


| क्रम संख्या / Sl.No | विषयः / Subject | लेखकः / Author(s) | Pg.no |
|---|---|---|---|
| 1 | Sanskrit as Natural Language Processor | Sri.Subba Rao Kochiraju<br>Ms.PrabhaSukla | 185-189 |
| 2 | कालिदासकृतिषु धर्मशास्त्र प्रबोधः | Sri. Gowri SankaraShenai | 190-193 |
| 3 | शैवपुराणेषु योगस्थानानि | Sri. B. Janardhan | 194-199 |
| 4 | श्रीमद्भगवद्गीतारीत्या स्वामिविवेकानन्देन प्रतिपादितः ज्ञानयोगः | Dr. D.V.S.S.R. Prasad | 200-208 |
| 5 | अक्षरसमाम्नाय-वातुलशुद्धतन्त्रयोः समीक्षा | Dr. L. V .SubrahmanyeswaraSarma | 209-213 |
| 6 | Managerial skills in Bhagavadgita | Dr. K. Padmaja | 214-216 |
| 7 | पञ्चतन्त्रम् - आधुनिककाले तस्य प्राधान्यं | Dr. N. Sashidhar | 217-223 |
| 8 | मनुस्मृतौ - नारीणां स्थानम् | Sri. R. Sridhar | 224-227 |
| 9 | The Culture of Rigveda | Sri. R. V. Satyanarayana | 228-229 |
| 10 | संस्कृत साहित्ये संभाषणा कौशलम् - आधुनिक समाजाय तस्योपयोगः | Dr. Joshi Santosh Kumar | 230-235 |
| 11 | श्रीनिधिस्वामिना संस्कृतं प्रति योगदानम् | Sri. C. Sreekanta | 236-239 |
| 12 | Vidura Gita – An insight into qualities of a leader | Ms. I. R. Nandini | 240-245 |
| 13 | कामन्दकमतानुसारं विद्यायाः स्वरूपम् | Sri. N. Ramu | 246-252 |
| 14 | मत्स्यपुराणे काव्यच्छाया | Sri. G.T.SreekrishnaBharadwaja | 253-259 |
| 15 | उतथ्यगीता - राजधर्माः | Dr. K. V. R. B. Varalakshmi | 260-263 |
| 16 | मालविकाग्निमित्रम् उत्तमगुरुशिष्य लक्षणानि - एकमध्ययनम् | Dr. P. Srivalli<br>Sri. K. Dinesh Babu | 264-266 |
| 17 | संस्कृतसाहित्यं - पर्यावरणपरिरक्षणम् | Ms. I. Vana Gayathri | 267-270 |
| 18 | आधुनिके युगे किमर्थं वेदाध्ययनम् | Dr.Muktha Vani | 271-277 |


Aug 2019

# उतथ्यगीता — राजधर्माः

**Dr. K.V.R.B. VARA LAKSHMI**
HOD OF SANSKRIT
SRI YN COLLEGE, NARSAPUR
**Mobile :9393392619**
varalakshmikvrb@gmail.com

राजन् शब्दो नकारान्तः पुंलिङ्गः। राजते शोभते इति अस्य शब्दस्यार्थः। राजृ-दीप्तौ इति धातोः राजन् शब्दः निष्पन्नः। अस्य शब्दस्य निर्वचनं विविधग्रन्थेषु बहुधा दृश्यते।

**"लोकसंरक्षणे दक्षः शूरोदान्तः पराक्रमी।**
**दुष्टनिग्रहशीलो यः स वै क्षत्रिय उच्यते॥**[1] इति।

लोकसंरक्षणतत्परो, बलवान्, इन्द्रियनिग्रहयुक्तो, दुष्टनिग्रहसमर्थः क्षत्रियशब्देनाभिधीयते।

**"रञ्जयिष्यति यल्लोकं अयमात्मविचेष्टितैः।**
**अथामुमाहू राजानं मनोरञ्जनकैः प्रजाः॥**[2]

प्रजानां हृदयाह्लादकारकः प्रजारञ्जकपरिपालनसमर्थो राजा इति ज्ञायते।

**"ब्राह्मणानां क्षतत्राणात्ततः क्षत्रिय उच्यते।**[3]

विप्रोत्तमानां आर्तिहरणात् क्षत्रिय शब्देन कथ्यते। **"रञ्जिताश्च प्रजास्सर्वास्तेन राजेति शब्द्यते।"** प्रजारञ्जकत्वात् राजेति कीर्त्यतेति व्यासेनोक्तम्। लोके धर्माधर्माणां नियमहेतुः राजा भवति। राज्ञा प्रभावेण राज्यस्य स्थितिः शान्तिश्च संभवति। राजा धर्मयुक्तश्चेत् ब्राह्मणक्षत्रियादि प्रजाः स्वस्वधर्मान् सम्यगाचरन्ति। तथैव ब्रह्मचर्याद्याश्रमधर्माः अपि आचरणीया भवन्ति। राजा धर्मपालनात् राज्यं, धनं, सौख्यं च प्राप्तुं शक्यते। अधर्मस्तु दुःखहेतुर्भवतीति ज्ञायते। तस्मात् राज्ञा सुखमिच्छता धर्मपालनमेव कर्तव्यमिति पापरूपाधर्मपालनं विसर्जनीयमेवेति ज्ञायते। राज्ञां धर्मयुक्तपरिपालनमेव मोक्षहेतुर्भवति। अत एव स्मृतिपुराणादिषु राजधर्माः प्रतिपादिताः। अग्निपुराणे सामान्यधर्मः एवं प्रतिपादितः।

**"अहिंसा सूनृता वाणी सत्यं शौचं दया क्षमा।**
**वर्णिनां लिङ्गिनां चैव सामान्यो धर्म उच्यते॥**[5]

हिंसाराहित्यं, सत्यं शौचं, दया, क्षमा इत्येते सर्वेषां सामान्य- धर्म इति ज्ञायते। न्यायमार्गेण धनार्जनं, वृद्धिः, रक्षणं, सत्पात्रे दानं इति राजप्रवृत्तिश्चतुर्विधा भवति।

ISBN No: 978-81-922167-1-3

...भारतम् भारतभावद्दीपव्याख्या समेतम्, श्री वेदव्यासमहर्षिः पण्डित रामचन्द्रशास्त्री
...ित्रवडेकर्, ओरियण्टल् बुक्स् रीप्रिंट् कार्पोरेशन्, आन्सीरोड्, नई दिल्ली, 1979 द्वितीय प्रचुरण
...महाभारतसंग्रहः-श्रीजयलक्ष्मी पब्लिकेषन्स्, हैदराबाद्-२०१२
...श्रीमद्भगवद्गीता , श्री वेदव्यासमहर्षिः, इण्डोलाजिकल् बुक् हउस् बि.एच्.यु. रोड् लङ्का, वाराणसी,
...१९८३

---

...रणानि

1. शुक्रनीतिसारः अ- १ – श्लोकः ४१ पृ. १
2. श्रीमद्भागवतम् – ४ – २६ – २५
3. श्रीमहाभारतम् – शान्तिपर्व – अ- ५९ – श्लोकः – १२६ – पृ. १०४
4. श्रीमहाभारतम्–शान्तिपर्व–अ-५९–श्लोकः– १२५ – पृ.- १०४
   श्रीमहाभारतम् – अ- २३८ - श्लोकः – १०- पृ. ३४७
5. अग्निपुराणम् – अ- ९० – श्लोकाः – – पृ. ११२
6. श्रीमहाभारतम् – शान्तिपर्व – राजधर्मप्रकरणम् – पृ. १८१
7. याज्ञवल्क्य स्मृतिः – राजधर्मप्रकरणम् – पृ. १८१
8. याज्ञवल्क्य स्मृतिः – अ- १ – श्लोकः – १४ – पृ. ४
9. शुक्रनीतिसारः – (छिनत्तीति वृषलः इति योगे दर्शितः) नीलकण्ठीयः – अ- ९०- पृ. – १५८
10. तेन वृषं लुनाति (छिनत्तीति वृषलः इति योगे दर्शितः) ... धनादिति धनवाची नान्तो धनशब्दः अर्तेर्गत्यर्थोन्मक् प्रत्यये
11. धर्म पदस्य द्वेधा व्युत्पत्तिमाह – धनादिति धनवाची नान्तो ... धनादिति पञ्चमीतु धनं प्रापयितुं स्रावति
    ततो न लोप गुणौ धनादि स्रवतीति धर्म इत्यर्थःधनादिति ... नीलकण्ठः -अ – ९० – पृ. - १५८
    द्रवति कृपायत इति ल्यब्लोपे ज्ञेया धारणाद्धर्मः" इति २० पृ. –
12. शुक्रनीतिसारः – अ – १ – श्लोकः – २४ – पृ. ७
    श्रीमद्रामायणम् – अयोध्याकाण्डः – सर्गः – ३८ – श्लोकः –

13.



...-81-922167-1-3

# THE CULTURE OF RGVEDA

**R. V Satyanarayana,**
Lecture in Sanskrit, Sri Y N College (Autonomous)
Narsapur, W,G,Dt A.P, Cell: 9398772282

**ABSTRACT:**

Rgveda was even believed by one very respected Indian scholar it was as old 600 B.C. the hymns. Cannot have been composed before the end of Harappa most of the Rgveda was composed between 1500 and 1000 B.C.

In Rgveda words are not conneted with any known Indo European Roots and were evidently barrowed from the natives.

There was no regular revenue system and king was maintained the tribute of his subjects and the booty won in the battle. This is sudas king of Bharatas.

"Brahmanasya Mukham Aseed --1

Bahu Rajanya Krutha

Ooru Tadasys Yad Vaishya

Padhyo Sudro Aajayath - 13"

His face become the Brahmana - the learner.

His face become the Kshatriya - the warrier.

His thighs became Vysya – the business man

The Purushr's feet became the Shudra – the worker or the servants

The Brahmana (Spiritual wisdom and splendor) was his face.

ISBN No: 978-81-922167-1-3

The Kshatriya (administrative and military prowess) his arms became.

His thighs were Vysya (commercial and business enterprise)

At his feet Shudra (productive and sustaining force) was born.

The four classes the priest (Brahmana) warrior (Kshatriya) peasant vysya and self (Sudra) were crystallizing throughout the period of the Rigveda. The above survived to the present day the Sanskrit word used for the Varna means colour. Does not mean caste and as never meant caste.

Though they had not developed a city civilization and did not build in stone or brick. The Aryans were technically well equipped their bronze sniths were highly skilled and produced tools and weapons much superior to those of the Harappa culture. They and the carpenters and chariot makers are frequently in the hymns with much respect.

978-81-922167-1-3



Dr. B. Naga Padmavathy
Dr. G. Amruthavalli Tayaru
Smt. K.V. Syamala Devi
P. Siva Prasad

# Nature and Environmental Conservation in Ancient and Modern Indian Literature

SEP-2019 **(Part - 3)**

Roshan Publications

# आनुक्रमणिका


| Sl. No | | Pg. No |
|---|---|---|
| 1 | वैदिकवाङ्मये प्रकृतिपर्यावरण परिरक्षणम् : डा.नोरि प्रभाकर शार्म | 1 |
| 2 | संस्कृत साहित्ये पर्यावरण परिरक्षणोपाया : **Dr.S.T.P.Kanakavalli** | 12 |
| 3 | प्रकृति परिरक्षणम् : **डा.उपद्रष्ट वेङ्कटरमणमूर्तिः** | 16 |
| 4 | प्राचीन वैदिक साहित्ये पर्यावरण संरक्षणम् : **Dr. Kasturi V.V.S.A.R.Chandra Sekhar** | 20 |
| 5 | अभिज्ञानशकुन्तलम् - प्रकृतिवर्णनसरणि : डा.सी.हेच्.पवनकुमारः | 28 |
| 6 | वेदेषु प्रतिपादित पर्यावरणम् : **Dr. K. V.R.B. Vara Lakshmi** | 34 |
| 7 | संस्कृत साहित्ये पर्यावरण परिरक्षणम् : **Kandukuri Dinesh Babu** | 38 |
| 8 | रामायणेतिहासे प्रकृति वर्णना - पर्यावरण परिरक्षणा : **Dr. Vani Kumari Maddukuri** | 41 |
| 9 | वेदेतिहासपुराणेषु पर्यावरणम् : **K.Dorai Rajan** | 45 |
| 10 | अभिज्ञान शाकुल्तले पर्यावरण परिरक्षणा व्दष्टिः **Dr.L.V.Subramanyeswara Sarma** | 55 |
| 11 | संस्कृत वाङ्मये प्रकृतेः प्रतिस्पन्दः आचार्य सि. ललिताराणी | 67 |
| 12 | रघुवंश महाकाव्ये वृक्षणां विपाकः **Dr.M.Raamachandra Rao** | 76 |
| 13 | Environmental Protection in Ramayana Epic : **Dr. Venkateswarlu** | 81 |
| 14 | वेदे प्राकृतिक विज्ञानम् : **आचार्य डा .धूलिपाल रामकृष्णः** | 89 |
| 15 | पर्यावरणमेव सामाजिक वनस्पति : **Dr.G.Amruthavalli** | 93 |
| 16 | स्मृतिशास्त्रों मे पर्यावरण चेतना : डा.डाली जैन् | 98 |
| 17 | ताजिकशास्त्रानुसारं कृषिकर्म विचारः पंकजशार्मा | 106 |
| 18 | Nature and Environment - An Ancient Indian perspective : **Prof. J.S.R.Prasad** | 113 |
| 19 | पर्यावरण शोभितं लङ्काराज्यम् : के.यशवन्त् कुमार रेड्डी | 119 |
| 20 | ఆదికావ్యమ్ . అష్టాదశ వర్ణన : డా. డి. జీవనశ్రీ | 123 |
| 21 | యశోధర మహాకావ్యం - ఋతుఘోషణ : డా.వై.బుజ్జి | 127 |
| 22 | Tree As a Symbol in the Select Poems of Toru Dutt and Gieve Patel | 132 |

# वेदेषु प्रतिपादित पर्यावरणम्

**Dr. K.V.R.B. VARALAKSHMI**
H.O.D. of Sanskrit
Sri Y.N.M. College
NARSAPUR

"वेदोऽखिलो धर्ममूलम्" इति श्रूयते धर्मस्य मूलाधारः वेद एव भवति। धर्मेण साकं पर्यावरणपरिरक्षणमपि उद्बोधयति। पर्यावरणं मानवजीवनस्य मूलाधारः भवति। पर्यावरणं अनुसृत्य सामाजिकाः, सांस्कृतिकाः आर्थिकादि प्रक्रियाः।

पर्यावरणं परितः आवरणं पर्यावरणं इत्युत्पत्तिः। "परि" आङ् इत्युपसर्गद्वयपूर्वकात् वृञ् आवरणे इति धातोः ल्युटि प्रत्यये कृते पर्यावरणं इति रूपं सिद्ध्यति। यद् आवृणोति सर्वान् चराचरात्मकान् तत् पर्यावरणं इत्यर्थः। अनेन भूम्यादीनि पञ्चमहाभूतानि, वनस्पतयः, सर्वे चराचर जीवाः अन्ये च पदार्थाः पर्यावरणे अन्तर्भवन्ति। अयं प्रपञ्च पृथिव्यप्तोजोवायव्यकाशमिति पञ्चभूतसमन्वितं भवति। अत एव श्रीमद्भगवद्गीतायां-

"भूमिरापानलो वायुः खं मनो बुद्धिरेव च।
अहङ्कार इतीयं मे भिना प्रकृतिरष्टधा॥1" इति

पर्यावरणे स्थावरजङ्गमात्मिका सर्वेप्राणिनः अन्तर्भवन्ति। एतैरेव स्थलजंगम वायुमण्डलानि निर्मीयन्ते। जलमण्डले सागराः सरितः, स्त्रोतांसि च सन्ति। स्थलमण्डले मृत्तिकाः सिक्ताश्च विद्यन्ते। वायुमण्डले नाइट्रोजन्, आकसीजन, कार्बनडयाक्सैड् च सन्ति।

वैदिकऋषयः पर्यावरणपरिरक्षणविषये जागरुकाः अभवन्। सर्वेऽपि प्राणिनः स्थलमण्डलद् भोजनं, जलमण्डलाद्रासं, वायुमण्डलाश्च प्राणवायुं प्राप्नुवन्ति। अथर्ववेदानुसारं जलं वायुरौषधं चैतानि त्रीणि पर्यावरणस्य मुख्यसंघटकतत्वानि सन्ति।[2]





वैदिकयुगे मानवाः प्रकृत्या सह जीवननिर्वाहं करोतिस्म। ते प्रकृतिं देवतारूपेण मानयतिस्म। "माता भूमिः पितोऽहं पृथिव्याः[3]" इति अथर्ववेदे कथितम्[4]।

पवित्रं वातावरणं आरोग्यप्रदायकं, मानवव्यक्तित्वविकासदोहदकारणं च भवति। वृक्षाणां संरक्षणमेव पर्यावरणपरिरक्षणस्य प्रथमसोपानं भवति। ऋग्वेदे वृक्षाणां कर्तनं अरिष्टदायकं इत्यवदत्। अत एव "वृक्षो रक्षति रक्षितः" इति श्लाघ्यते। "वृक्षेभ्यः हरिकेशेभ्यश्च नमो नमः" इति हरितं पर्णवृक्षं देवतारूपेण पूजार्हं भवति।

यजुर्वेदे विविधस्थलेषु वृक्षाणां देवतारूपेणाधारकत्वं दृश्यते। यथा "नमो वृक्षेभ्यः।[5] वनानां पतये नमः।[6] ओषधीनां पतये नमः।[7] वृक्षाणां पतये नमः।[8] पर्यावरणपरिरक्षणे सूर्यभगवानस्य महत्वं योगदानं च वर्तते। सः वायुमण्डलं जलं पृथिवी च शोधयति कृमिनाशकः संसारवृद्धिपोषणहेतुः सविता कथ्यते।

"आरोग्यं भास्करादिच्छेत्" इति श्रूयते। यत्र सूर्यरश्मयः न यान्ति तत्र कीटाणवो वर्धन्ते, तेन रोगवृद्धिश्च भवति। सूर्यः अंशुभिः चराचरात्मकं सकलं जगत् चैतन्यवन्तं दीप्तिमन्तं च करोति। "उभाभ्यां देव सवितः पवित्रेण सवेन च मां पुनीहि विश्वतः" इति गायत्रीमन्त्रेऽपि सूर्यस्य तेजसा वृद्धिविकासः सम्भवतीति ज्ञायते।

अपि च वैदिककालेमानवजीवनसंरक्षणाय पर्यावरणरक्षणाय बहवः उपायाः कथिताः। तस्मिन् काले पर्यावरणप्रदूषणसमस्या नास्ति। तथाऽपि अग्निहोत्रादयः पर्यावरणपरिरक्षणार्थं कृतवन्तः।

ऋतूनां क्रमः ऋतूनां च प्रक्रिया अथर्ववेदे "प्रकृति-यज्ञ" नाम्ना कथिता। "त्रीणिच्छन्दांसि"[9] इति जलवायुवनस्पति संरक्षणेन पर्यावरणस्य संरक्षणं सम्भवति।वनानां संरक्षणे पर्यावरणस्य संरक्षणं भवति। "वृक्षो रक्षति रक्षितः" इति विदितमेव जलसंरक्षणं-आधुनिककाले "నీటి బొట్టు ఒడిసి పట్టు" जलबिन्दवः अमृतबिन्दुसमानाः। पर्यावरणपरिरक्षणे जलसंरक्षणं परमं महत्वं वर्तते। सर्वे प्राणिनः विना जलं न जीवन्ति। प्राणिनां कृते जलशुद्धि

आवश्यकी। ऋग्वेदे शुद्धजलं सर्वरोगहरणं अमृतमिवं मन्यते। "अप्सु अन्तरमृतं अप्सु भेषजम् अपामृतं प्रशस्तये।[10]

शुद्धजलं घृतमिव प्रत्येकशक्तिसमन्वितं अपि अथर्ववेदे "आपो भद्रा घृतमिदाप"[11] इति कथितम्।

**वायुसंरक्षणम्:-**

पर्यावरणपरिरक्षणे जलशुद्धिरेव वायोः शुद्धिरपि आवश्यकी। दोषरहितवायुः अमृततुल्यं सर्वरोगहरणं औषधं भवति।वात आवातु भेषजं शम्भु मयोभु नो हृदे प्राण आयूंषि तारषित्।"[12]

**पृथिव्याः संरक्षणम्:-**

अथर्ववेदे पृथ्वीसूक्ते सुगन्धिता पृथिवी सर्वान् सुगच्छितान् करोत्विति प्रार्थना दृश्यते। "यस्ते गन्धः पृथिवी तेन मा सुरभिं कृणु"[13] इति पृथिव्याः प्रशंसा।

आधुनिककाले अनेकैः कारणैः पर्यावरणं प्रतिदिनं प्रदूषितं भवति। अद्य जलं, वायुः खाद्यं समस्तं वस्तुजातं दोषभूयिष्टमेव। अनेन वातावरणकालुष्येण मानवजातिः रोगमयः अभवत्। "यथा वायुः तथा आयुः" इति श्रूयते। आधुनिककाले पर्यावरणमेतादृशं दूषितं जातं यत् श्वसनाय शुद्धवायुः, पातुं शुद्धजलं, भोक्तुं शुद्धभोजनमपि नोपलभ्यते। अद्य पर्यावरणसमस्या अन्तराष्ट्रियमस्या वर्तते। प्रकृतिसंरक्षणात् एव पर्यावरणसंरक्षणं सम्भवति। मानवाः प्रकृत्या सह मैत्रीपूर्णं जीवनं कल्पयतु तथैव वास्तविकं पर्यावरणस्वरूपं प्राप्तुं शक्यते।

सिन्धुपत्नी सिन्धुराज्ञीः सर्वाः याः नद्यः स्थनदत्त नः तस्य भेषजं तेन वः भुन जा महै।[14] इति इति अथर्ववेदे नदीरूपो अभ्यः अस्माकं सर्वेषां प्रति औषधं ददतु आरोग्यं ददतु।

-:: इति शम् ::-



**उपयुक्तग्रन्थसूची :**


1. अथर्ववेदभाष्यम्-1, प्रथमो भागः. वैदिकसाहित्यप्रचार समितिः, भाग्यनगरम्-२००६
2. यजुर्वेदभाष्यम्-प्रथमोभागः- वेदधर्मप्रचारसमितिः-भाग्यनगरम्, 500066-२०१२
3. सामवेदभाष्यम्-प्रथमोभागः- वेदधर्मप्रचारसमितिः-भाग्यनगरम्, 500066-२०१२
4. ऋग्वेदसंहिता-तिरुमल तिरुपति देवस्थानम्, तिरुपतिः-१९८२
5. शब्दसागरः-चौखाम्बा संस्कृत सीरीज्-वाराणसी-२००२
6. अथर्ववेदसंहिता-तिरुमल तिरुपति देवस्थानम्, तिरुपतिः


---

**उद्धरणानि:**

1. श्रीमद्भगवद्गीता-अ-७-श्लो-८
2. अथर्ववेदः-२८-२९
3. अथर्ववेदः-२२/२/१२
4. शतपथब्राह्मणम्-२४/१/२१
5. यजुर्वेदः-२६-१६
6. यजुर्वेदः-१६-२८
7. यजुर्वेदः-१६-२९
8. यजुर्वेदः-१६-२८
9. अथर्ववेदः-१-१७
10. ऋग्वेदः-१-२३-१९
11. अथर्ववेदः-३-१३-५
12. ऋग्वेदः-१०-१८६-२&३
13. पृथिवीसूक्तम्-१२-१-२४
14. अथर्ववेदः-६-३-२५, पृ.-६१

# स्मृत्यनुसारं स्त्रीधनविषयः

# PROPERTY RIGHTS ACCORDING TO SMRUTIS

**Dr. K.V.R.B. Varalakshmi**
*HOD of Sanskrit, Sri Y.N.M. College, Narsapur, AP*
*Email: varalakshmikvrb@gmail.com*

**Received: Jan. 2020 Accepted: Feb. 2020 Published: Feb. 2020**

**Abstract**

"स्त्रीधनं इरि द्विपदसम्मेलनं भवति। स्त्रीधनस्य स्त्रीसम्पत्तिरिति शाब्दिको अर्थः। कौटिल्यस्य परिभाषायां "वृत्तिराबध्यं वा स्त्रीधनम्। परद्विसहस्रस्थात्या वृत्तिः आनाह्यं नियमः।[1] अर्थात् वृत्तिः जीवनवृतिः एवम् आबाध्यं यच्छरीरधारणं कृतं यस्या यथाभूषणं स्त्रीधनम्। विवाहसमये कन्यानां कृते मात्रा, पित्रा पत्या, भ्राता अन्यसम्बन्धिता च दत्तं धनं वसुजातं च तत्सर्व स्त्रीधनमिति मन्तव्यम्।

Meaning of Stridhan:
The word stridhan is composed of two words: Stri (woman) and Dhana (Property). The word means the property belonging to a woman or woman's property. This is the etymological sense but the word has a technical meaning given in law2. As observed in Rajamma Case.3 A gift given to a Hindu woman before and after her marriage constitute womans property. Thus conjunctively these two words imply that property over which a woman has an absolute ownership.

स्त्रीणां धनसम्प्राप्तिः कथं सम्भवति इति विचार्यमाणे स्त्रीधनं षडिधं भवति। "अध्यग्न्याध्यावाहनिकं दत्तं च प्रीतिकर्मणि" प्रथमं अध्यग्निः विवाहसमये अग्निं पुरस्कृत्य यत् धनं पित्रादिभिः दीयते तत् अध्यग्निः।[4] अवाहनिकं द्वितीयम्। विवाहानन्तरं पतिगृहगमनसमये पित्रादिभिः दीयमानं धनं अध्यावाहनिकम्[5] इति कथ्यते।

According to Manu "Adhyagni (whatever has been given at the time of nuptial fire), Adhyavahanika (whatever has been given at the time of departure of wife), Dattamprite karmani (given out of love and affection) and given by the Father, Mother or the brother, all these are six types of gifts which come under the term Stridhan.6According to Vishnu Anything given to a woman by her father, mother, sons and brothers or whatever is received by her at nuptial fire, or whatever she receives from her husband at remarriage, or what she receives from her relatives and the gifts received by her after marriage is stridhan7.

**Keywords:** स्त्रीधनं, अैध्यब्गननः, अैध्यावाहिनकम्, अैन्वधेयम्, काञ्चनम्, Modern Hindu Law.

"यत्र नार्यस्तु पूज्यन्ते रमन्ते तत्र देवताः
यत्रैतास्तु न पूज्यन्ते सर्वास्तत्राफलाः क्रियाः[8]

स्त्रियः यत्र सम्मानं प्राप्नुवन्ति तत्रैव सर्वदेवताः निवसन्तीति स्मृतिः। "स्त्रि" इति पदं सत्त्वरजस्तमोगुणानां सम्मेलनं भवति। एषा प्रकृतिः सत्त्वरजस्तमोगुणसम्मिलिता एव। प्रकृतेः पर्यायरुपः स्त्रीमूर्तिः। स्त्रीणां संरक्षणं, आदरणपूर्वकपालनं, पोषणं च भारतीयसंस्कृतेः प्रधानविषयः। "मातृ देवो भव। पितृ देवो भव।"[9] इति मातृमूर्तिं देवतारुपेण अभिवर्णयति तैत्तरीयोपनिषत्। "जननीजन्म भूमिश्च स्वर्गादपि गरीयसी"[10] इति आदिकाव्यं अबोधयत्। श्रीशङ्करभगवत्पादाचार्यः कुपुत्रो जायेत, क्वचिदपि कुमाता न भवति" इति अस्तुवत्। श्रीमन्महाभारते "माता गुरुतरा भूमेः, पिता उच्चतरं च खात्"[11] इति धर्मराजः यक्षप्रश्नानां समाधानं अकथयत्।

"माता सर्वभूतेषु शक्ति रुपेण संस्थिता।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमोनमः॥
या माता सर्व भूतेषु विद्यारुपेण संस्थिता
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमोनमः॥"

इत्यादि वाक्यैः स्त्रीमूर्तिरेव दुर्गालक्ष्मी सरस्वती रुपैः आराध्यन्ते इति ज्ञायते।

तथापिआधुनिककाले अधर्म, अन्यायं प्रबल्य स्त्रीणामुपरि अत्याचाराः अधिकमभवत्। स्त्रीधनविषयं प्रधानं स्वीकृत्य विविधवादाः समजनि। धनमूलमिदं जगत् इति सर्वैरपि विदितमेव। अत एव भर्तृहरि महाकविः "सर्वेगुणाः काञ्चनमाश्रयन्ते"[12] इत्यकथयत्।

तृतीयं अन्वाधेयम्। विवाहोपरान्ते पतिकुल पितृकुल बन्धुजनैर्यत् प्राप्तं तद् अन्वधेयम्। विवाहानन्तरं पतिगृहे स्त्रिया यद्धनं लभ्यते तत्[13] अपि च भात्रा, बन्धुभिः, पितृभिः विविध समयेषु दत्तं धनं च भवति।

संस्कृतसाहित्ये गौतम, नारद, आपस्तम्ब, विष्णु, व्यास देवल इत्यादयः सर्वेऽपि स्मृतिकाराः स्त्रीधनस्य उपरि स्त्रीसत्वस्य स्वाभिप्रायाः सुष्ठु प्राकटयत्। अत्र एकः विचारः एवं गोचरति। अन्नवस्त्राभरणानि स्वसम्बन्धिभिः प्राप्तानि तानि सर्वाणि तस्याः व्यक्तिगतानि भवन्ति। तेषां उपरि स्त्रीणां अधिकारं, स्वातन्त्र्यं च दृश्यते। एतादृशस्य स्त्रीधनस्य उत्तराधिकारः कः प्राप्नोतीति विषये एवं अकथयत् नारदः "पुत्राभावं तु दुहिता तुल्यसन्तानदर्शनात्"[14] पुत्रस्य अभावे पुत्र्या अधिकारं बलपूर्वकं समर्थयति। पुत्रः वा पुत्री एव पितृवंशस्य उद्धारकौ भवतः।

अपि च मनुस्मृतिमनुसृत्य अविवाहितपुत्रीकृते प्राचीनसमये पैतृकसम्पत्तितः चतुर्थांशसम्पति भ्रातृसकाशात् प्राप्ता अभवत्।[15] वैदिककालेऽपि अविवाहिताः याः कन्याः स्वपित्रा सह आजीवनं गृहे निवसन्ति स्म, ताः कन्याः अभुजा इति संज्ञया कथ्यते स्म जनैरिति। ताः अपि सामान्यरूपेण पैतृकसम्पत्तेः उत्तराधिकारिण्यः भवन्ति। तादृश स्त्रीधनस्य स्त्रियः एव आधिकारिण्यः न तु पुरुषाः। अपि च कन्यादानमन्त्रेषु वायुपुराणे-

"कन्यां कनकसम्पन्नां कनकाभरणैर्युताम्।
दास्यामि विष्णवे तुभ्यं ब्रह्मलोक जिगीषया॥"

इति श्लोकेन कन्यायाः स्त्रीधनरूपे अधिकं धनं पितृभ्रातृव्यादिभिः सम्प्राप्तम्। परिणयसमये प्रदत्तस्य धनस्योपरि स्त्रीणामेव स्वामित्वं न तु पुरुषाणाम्। कतिपयः स्त्रियः राजपरिवारे द्वारपालिकाकर्म सेविका कर्म च कृत्वा धनं सम्पादयन्ति। तद्धनस्य स्वामित्वं तासामेव। स्त्रीधनस्य उपयोगः पुरुषैः न कर्तव्यः।

यदि विपत्काले सम्प्राप्ते तर्हि नारीणां अनुमतिं आदाय पुरुषः स्त्रीधनं स्वीकरणीयम्। तथापि तद्धनं द्विगुणीकृत्य वा अर्धद्विगुणीकृत्य नारीणां कृते प्रदेयम्।

Katyayana too while enumerating six kinds of stridhan, identified two more things, under it earning through art and gifts received during unmarried state and those gifts received when the bride went to marital home as also those which was received by her during her widowhood.16 According to him father, husband, son or brother do not have a right to use or alienate the property falling under stridhan of a woman. Any body who uses the property without woman's consent is liable to return the same with interest and will also have to pay fine to the king. In case of distress of husband or when he suffers from any disease or is being tortured by the creditors, the woman can herself voluntarily contribute out of the stridhan but the husband should reimburse her later on.

पुरातनकाले स्त्रीधनस्य उपरि स्त्रीणां सम्पूर्णाधिकारं स्वमित्वं, प्रभुत्वं चासीत्। पुत्री यदि विवाहिता न भवेत् तर्हि सा पुत्रवत् पितुः सम्पत्तेरधिकातिणी भवति।

भागिनीभ्रातोः प्रेम, आत्मीयता, सहानुभूतिरित्यादि गुणैः कालयापनं कुर्वन्नास्ते। भगिनीहस्तभोजनं इत्यादि उत्सवः परस्पर स्नेहभाव प्रवर्धनार्थं प्रचलिताः। भगिनीं प्रति भ्रातृणां सम्पूर्णप्रेमा, सन्तोषः, विस्वासश्चासीत्।

शनैश्शनैः कालगमने मूल्यानि अधोगतिप्रापकान्यभवत्। स्त्रीधनविषये सर्वैरपि अनुचितवृत्तिं प्रादर्श्य असन्तुष्टाः अभवन्। स्त्रीणां चित्तादपि वित्तमेव प्राधान्यं मन्यन्ते।

आधुनिककाले अर्थस्य सम्पत्तेः उत्तराधिकारस्य च महत्त्वाकाङ्क्षया विना सौहार्दं प्राणहरणमपि कुर्वन्ति। प्राचीनकाले नारीणां आर्थिक दृष्ट्या स्वतन्त्रता दरीदृश्यते।

अपि च मातापित्रोः प्रधानाशयः अपत्यानां अन्योन्य स्नेहपूर्वक जीवेनम्। अत्रैकं उदाहरणं स्कन्दपुराणे कुमारी नाम कन्यायाः समीपं गत्वा भ्रातरः एवं अभ्यर्थयत् अस्माकं राज्यं विभज्य अस्मत्पुत्रेभ्यो दापय इति। अनेन भगिनीं प्रति भ्रातृणां संपूर्णप्रेमः विश्वासश्च सुव्यक्तम्।

उपयुक्तग्रन्थसूची :

1. स्कन्दपुराणम्-आनन्दाश्रममुद्रणायः-पूना,१९६९
2. मनुस्मृतिः —चौखाम्भा संस्कृतसीरीज्, वाराणसी, १९८०
3. वैदिककालीन नारी श्रीभगवतशरण उपाध्यायः, दिल्ली
4. अष्टादशपुराणेषु नारी, सम्पूर्णानन्द विश्वविद्यालयः, वाराणसी-१९९७
5. Position of Women in Hindu Civilization, A.S. Saltekar, 1987, Motila Banarasi Das, Delhi
6. श्रीमन्महाभारतम्-BORI, Pune
7. अर्थशास्त्रम्-कौटिल्यः
8. भर्तृहरि सुभाषितानि – GVH Publications, Vijayawada, 1996

1. कौटिल्यः अर्थशास्त्रम्

2. B.M. Gandhi, Hindu Law, 1999 p. 178

3. Rajamma vs. Varidarajula Chetti, AIR 1957 Mad 198.

4. विवाहकाले यत् स्त्रीभ्यो दीयते दयग्निसन्निधौ इति कात्यायनः

5.यत्पुनर्लभते नारी नीयमाना तु पैतृकात् अध्यावाहनिकं नाम तत् स्त्रीधनमुदाहृतम्-
कात्यायनः

6. Dr. U.P.D. Kesari, Modem Hindu Law, 3rd edition, 2001, p. 357.

7.Dr. U.P.D. Kesari, Modem Hindu Law, 3rd edition, 2001, p. 357.

उद्धरणानि

8. मनुस्मृतिः-अ-३, श्लो-५६, पृ.१११

9. तैत्तरीयोपनिषत् ,शिक्षावल्ली ,एकादशानुवाकः

10. श्रीमद्रामायणम्-युद्धकाण्डः-

11. श्रीमन्महाभारतम्-वनपर्व-यक्षप्रश्नाः

12. भर्तृहरि सुभाषित त्रिशति-अर्थपद्धतिः-श्लो-३२

13. विवाहात्परतो यत्तु लब्धं भर्तृकुले स्त्रिया अन्वाधेयं तद्धनम्

14. नारदसंहिता-९५-९६-१

15. स्वेभ्योंशेभस्तु कन्याभ्यः प्रदद्युर्भ्रातरः पृथक्-मनुस्मृतिः-अ-९-श्लो-११८, पृ.-४८०

16.Dr. U.P.D. Kesari, Modem Hindu Law, 3rd edition, 2001, p. 357.